Sanskrit Kirtanas Composed by Shri Ambishastri

# श्री अम्बिशास्त्रिभिः प्रणीतानि संस्कृत कीर्तनानि

## Document Information

Text title : Kirtanas composed by Ambashastri

File name : kIrtanAniambAshAstri.itx

Category : deities_misc, sangraha, kRitI

Location : doc_deities_misc

Author : Ambashastri

Proofread by : Pallasena Narayanaswami

Description/comments : See the scan for explanation in Tamil

Latest update : June 14, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# श्री अम्बिशास्त्रिभिः प्रणीतानि संस्कृत कीर्तनानि

श्रीः ॥

। हरिः ॐ ।

## १. विनायकः

(नवरागमणिमालिका)
रागः तोडि
मदावलमुखं वरं महितवैभवं देवतैः
मदान्धसुरवैरिणां निखिलगर्वनिर्वापणम् ।
जगत्त्रयसमुद्भवप्रचुरविघ्नविध्वंसिनं
शिवत्रयविनायकं शिवसुतं भजे सन्ततम् ॥ १॥

## २. षण्मुखः

रागः हंसध्वनि
अम्भोजासनवन्दिदङ्घ्रिकमलं जम्भारिसंसेवितं
दम्भोलिं दृढदानवादिदलने शम्भोस्सुतं षण्मुखम् ।
पार्वत्या वदनाम्बुजाऽहिमकरं भक्तप्रियं भव्यदं
(शूरं) बर्हिणवाहनं सुरगुरुं ध्यायामि चित्ते सदा ॥ २॥

## ३. नटराजः

रागः मलहरि
वन्दे हेमसभान्तरस्थितमजं वन्दे सुराणां पति
वन्दे नीलगलं शिवं त्रिणयनं वन्देऽहिराट्भूषितम् ।
वन्दे शैलसुताविराजिततनुं वन्दे (जगद्रक्षकम्)

वन्दे विष्णुविधीन्द्रवन्दितपदं वन्दे नटाधीश्वरम् ॥ ३॥

## ४. शिवकामसुन्दरि

रागः हमीर् कल्याणि
धम्मिल्लद्युतिनिर्जिताऽसितघना नीलाब्जनेतोज्ज्वला
राकाचन्द्रनिभानना (वरगला) कुम्भीन्द्रकुम्भस्तनी ।
(मध्येव्योम) तनूरुहालिजलदा पाथोरुहाङ्घ्रिद्वया
साहित्यं शिवकामिनी वितरताद्वीटीरसेनाऽद्य मे ॥ ४॥

## ५. त्रिपुरसुन्दरि

रागः धन्यासि
अहार्यकुलदीपिकां अहरधीशकोटिप्रभां
विहारसदनीभवद्विमलभक्तहृत्पङ्कजाम् ।
सुहासवदनाम्बुजां शुभकृपारसालोकनां
महात्रिपुरसुन्दरीं मनसि भावये शङ्करीम् ॥ ५॥

## ६. बाला

रागः साम
अरुणाम्बुरुहानना मनोज्ञा
तरुणादित्यसहस्रकोटिशोभा ।
मधुवैरिसुपूजिताङ्घ्रिपद्मा
मधुरा मे कवितां ददातु बाला ॥ ६॥

## ७. प्रितज्ञा (नटनसभ्श स्तुति) चोउल्द् थिस् बे प्रतिज्ञा ?

रागः वराळि
श्रीमद् व्याघ्रपदस्य पन्नगपतेत्तस्य सन्दर्शितुः
श्रीमद्धेमसभापतेः त्रिजगतीनाथस्य गौरीशितुः ।
पार्वत्याः करुणानिधेश्च चरितान्येवं प्रवक्ष्येऽधुना
सप्रासानि पदान्यमूनि विविधैर् रागैर्विचित्राण्यहम् ॥ ७॥

## ८. आत्मप्रशंसा (१)

रागः क्दारं
अल्पाऽपि वाग्वृत्तिरियं मदीया
लोके भृशं राजति सार्वकालम् ।
श्रीमन्नटेशस्य गुणप्रपञ्चः
यद्वर्ण्यतेऽस्यामपि हैमवत्याः ॥ ८॥

## ९. आत्मप्रशंसा (२)

रागः सुरुटि
तनीयसीमप्यनिशं बुधौधाः
मदीयवाणीमुपलालयन्ति ।
निशम्य (कोह्युल्बणवर्णबन्धां)
स्वबालवाचं न (समाद्रियेत) ॥ ९॥

शिवकामसुन्दर्यै नमः ॥

॥ शुभमस्तु ॥

## १. विनायकः (कल्पक विनायकः)

रागः नाट्टै
चारणगन्धर्वसुराऽसुरपरिपूज्यपाद ।
नारदसन्नुत भुवनकारणविग्रह भोः ।
घोरसुरारातिजनदारण निर्दय विघ्नं
(वि)दारय कल्पकनामवारणवक्त्र विभो ॥ १॥

## २. षणमुखः

सुन्दर षणमुख गौरीनन्दन पङ्कजभव -
मुकुन्दपुरुहूतसुरवृन्द समीडित भोः ।

सन्तलमाकलितोरु कुन्दधनुश्शर -
शक्तेऽमन्दमिह केकिरथ स्कन्द शुभं कुरु मे ॥ २॥

## ३. कनकसभेशः

अनलसुधाकर रविलोचन नगजारमण शिव
सनकसनन्दनविनुत धनदसखेऽखिलद ।
घनकलुषतिमिरविभेदनचतुर रविचरण
मनसि वस नटनपते कनकसभेश्वर मे ॥ ३॥

## ४. शिवकामी

श्यामलतन्वङ्गि शिवे कोमलपादाम्बुरुहे
वाम (करभोरु शुभे) सामजकुम्भकुचे ।
हेमसभाधिपकान्ते, तामरसदलनेत्रे
सोममुखि पाहि, शिवकामिनि मां कृपया ॥ ४॥

## ५. विनायकः

रागः कौलं
। पल्लवि ।
पालय गणेशाऽधुना पाशाङ्कुशधराऽ-
दीनफालानलविलोचन पार्वतीमुखाम्बुजेन
। अनुपल्लवि ।
कुन्दसमानकदन्त कुम्भजपूज्य निरन्त
(कुञ्जराङ्गाऽऽनन्दकन्द सन्नुतामरेशवृन्द ) । (पालय)
सामजाधीश्वरवक्त्र सोमशेखर त्रिणेत्र
हेमसभाधीशपुत्र हेरम्बाऽमरेशमित्र । (पालय)
शिवत्रयविनायक शिवमतिविधायक
भवपयोधितारक पाहि विघ्नविनायक । (पालय)

## ६. पळनिक्षेत्रताण्डवः

रागः सैराष्ट्रं
। पल्लवि ।
अवतु मामिह अवतु मामिह
भवपयोनिधिपरिगतं भृशकातरं
भवतनूभवभवुक (भविक)दायक
तव दयानयनाम्बुजम् । (अवतु)
। अनुपल्लवि ।
अघविमोचन (मखविभेदन-
सखसुपूजित) सुन्दर सुखद
सूकर शिखरि शोभित शिखरवत्स दयानिधे । (अवतु)
। चरणम् ।
जलजसम्भब जलजलोचन (बलपरा(त्या)दि सुरार्चित )
फलविदायक खलजनाहित फलपुरीश परात्पर । (अवतु)
शुभ षडानन विहगवाहन(दहनदेहसमुद्भव)
जहि ममाहितं अहिविभूषण महि(ही)धराधिपजासुत । (अवतु)

## ७. स्वामिनाथः

रागः केदारगौळं
पालय षडाननेश सुशीलसन्नुतचरण
त्रिभुवनकारण क्रौञ्चविदारण (पालय)
स्कन्द दानववृन्दभञ्जन (सुरासुराखिलदायक)
धृतशर नायक वल्लीसुनायक (पालय)
मारकोटिसमान गौरीकुमार कुक्कुटकेतन
(तारकदत्तमयूरासन) (पालय)
स्वामिशैलनिवास ते पदं नौमि शङ्करबालक
भृतमणिजालक (जगदधिपालक) (पालय)

## ८. षण्मुखः

रागः श्रीरागं

धीर षण्मुख मञ्जुहार (हास) कुमार
तारकासुरमद्वार(भार) भजन शूर धीर
(दारितक्रौञ्चसानो, वारित सैन्य) मण्डलान्धकार
भेद्चण्डभानो
भूतरोगखण्डनेश्वर अण्डजेशपुरीमध्य (मण्डलेश्वर)
(लोल कुण्डल युगल) शोभि गण्डमण्डल मां त्राहि (धीर)
स्कन्द् बालिका (वल्ली) प्रियनन्दन बर्हिणवाह सन्ततं मुनीन्द्र -
(वन्दितपाद द्वन्द्व) चापबाणशक्तिचन्द्रहास मुख्य शस्त्रवृन्द-
भासुरकरारविन्द सुन्दर - मां त्राहि (धीर)
(पुरुषोत्तमादिदेववृन्दवन्दितपाद)तरुण देवयानेश
करुणाम्बुनिधे परुषभवाम्भोराशिपरिगते मयि कृपां
(निधेहि वैद्यनाथसूनो) गुरुनायक- मां त्राहि (धीर)

## ९. बाला देवि - शिवकामसुन्दरि

वण्णक्कुळिप्पु
रागः नाट्टकुरिञ्जि
। पल्लवि ।
बाले मरतकनीलेऽरुणरुचिचेले जननविभञ्जने
बालेन्द्वतिशुभफाले जगदनुकूले कुरु मम भावुकम् । (बाले)
। चरणम् ।
दारुणे (यमभटवारणे) गतिजितवारणे कनकविभूषणे
प्रारणे (प्राङ्गणे) मणिशुभतोरणे त्रिभुवनकारणे कमलदलेक्षणे ।
(निलिम्पकरिकटनितम्बिनि) जनकदम्बपूजितवैभवे
मदम्ब सुन्दरनितम्बशोभिनि चिदम्बरेश्वरवल्लभे ।
भामिनि हे शिवकामिनि सज्जनकामितदानविचक्षणे
त्वामिह देवि नमामि सुकेशिनि मामिह पाहि दयानिधे

## १०. शिवकामसुन्दरि

रागः शङ्कराभरणं
। पल्लवि ।
शङ्करि शशिशेखरे शङ्करि तव पादनीरजे देहि भक्तिम् ।

पङ्कजभवनुते भवुकवारिधे शङ्करि ।
(इन्द्रारिमहीरुहहरणपरशुधारे) चन्द्राननमहसा
बहुलशोभिते यात्राकृते सरोजदलनिभपदयुगे
मन्त्रापूरितदेहे महनीयमूर्ते शङ्करि ।
चण्डाभिधानदितितनूजसंहारिणि दण्डायुधाचलदमन
दम्भोले कुण्डलीश्वरमुख्यमुनिजनवन्दिते
खण्डपरशुकान्ते कम्बु कन्धरे (शङ्करि)
सल्लापजितपिकवल्लकिध्वने देवि उल्लासिदयापाङ्गे
दुरितनायके कल्हारदलनेत्रे काङ्क्षितवरं देहि
तिल्लाटवीशे शिवकामसुन्दरि शङ्करि शशिशेखरे

## ११. शिवकामसुन्दरि

रागः नादनामक्रिया
। पल्लवि ।
कालारिकान्ता पातु मां, सततमनुकूला सती सुवागुमा ।
शैलाधिपति शुभबाला कराभिधृतलीलाशुका या
शिवकामसुन्दरि सा गौरी (कालारि)
वामा वारिजलोचना वदनजितसोमा सुखदा शोभना
कामारिदत्ततनुवामाऽमरारिजनभीमा
पयोजभवपूजितपादाम्बुजाता (कालारि)
धीरा दुरितहारिणी परिलसितघोराऽसिखेटधारिणी
हाराभिरामकुचभारा भवा निगमसारावली
सकललोकदयापरी गौरी (कालारि)
शरशोभिपाणिका रुचिरकचभरवञ्चितबलाहका
शरणागतार्तिहारिचरणारविन्दा चिदम्बरनायकीशा
परमानन्दस्वरूपा देवी (कालारि)

## १२. शिवकामसुन्दरि

रागः घण्टारवः
कदम्बविपिननिवासे वरनिलिम्पकामिनि कदम्बविनुते
मदम्ब शोभनरूपे परचिदम्बरेश्वरकामिनि बाले ।

शङ्करि शङ्करि गौरी (रि)शिवशङ्करि
गौरी (रि)जयशिवशङ्करि गौरि ।
कुम्भभवेडितपादे दैत्यदम्भविभञ्जने जम्भारिवन्द्ये
शुम्भदनूद्भवनाशे शातकुम्भघठपीनतुङ्गकुचाढ्य् (शङ्करि)
कुन्दसमानशुभदन्ते देवि मन्दहासजितचन्द्रमयूखे
सुन्दर वारिजनेत्रे शुभचन्दनकुङ्कुमशोभितगात्रि (शङ्करि)
कुण्डलभासुरकर्णे मणिमण्डलमौक्तिकमञ्जुकिरीटे
चण्डसुरेश्वरवैरि परिखण्डननिर्भरपेशलबाहो (शङ्करि)
कोमलपङ्कजपादे नवसोमसाधारणवामललाठे
हेमसभान्तरवासे शिवकामसुन्दरि मां पाहि कृपाब्धे (शङ्करि)

## १३. शिवकामसुन्दरि

रागः देवगान्धारि
हेमललाकि (टि)कालसत्फाले मत्तसामजगमने गानलोले
कामदानकामधेनुशीले शिवकामसुन्दरि मां पाहि बाले ।
पुण्डरीकपुरान्तरवासे रत्नकुण्डलयुगले शुभनासे
चण्डमुण्डमथनानायासे शिवकामसुन्दरि
नीरजाक्षि निखिलकल्याणि चारुसाररसने
शङ्करि शर्वाणि कीराभयकरे मञ्जुवाणि शिवकामसुन्दरि
भक्तजनहृदयावस्थाने देवि चित्तमधिवस मेऽसमाने
नृत्तराजवामभागलीने शिवकामसुन्दरि मां पाहि बाले ।

## १४. शिवकामसुन्दरि

रागः कुरञ्जि
बाले शिवकामि पाहि
कटिशोभिदुकूले कौतुकं मे देहि
कुचोपमितशैले मानसं ममैहि, धृतसोमे शिववामे
दैत्यभीमे बाले
पाकशासनाभिवन्द्ये प्रतिदिवसं लोकरक्षणाभिनन्द्ये
शङ्करि मम शोकादिनि योगिचिन्त्ये कुन्ददन्ते देवि निरन्ते
आनन्दकन्दे बाले ।

ताण्डवेशनाट्यसाक्षि भवानि पुण्डरीकदृग् वामाक्षि
नमितजनषण्डसादरकटाक्षि चारुहारे
कनककोटीरे गौरि गम्भीरे बाले

## १५. शिवकामसुन्दरि

रागः मुखारि
। पल्लवि ।
बाले लसितदुकूले पाहि सुमाले शुभलीले
मत्तदन्तावलयाने नित्यकल्याणि सम्माने
भक्तजनसम्पालने मुग्धेन्दुमौले सन्नतमुनिसत्तमजाले
मामक(के) एहि चित्ते सुशीले बाले
तोयजातदलनेत्रे च्छायाधिक्य शुभगात्रि मेयविहीने
सवित्रि मायास्वरूपे पाणिविधृतसायकचापे
दानवोपरि भूयस्सकोपे बाले
कुन्दसाम्यचारुदन्ते मन्दहासजितचन्द्रे सन्ततं
सदयाक्ष्यन्ते सुन्दरगाने हे शिवकामसुन्दरीशाने
मयि करुणां स्यन्दय दीने बाले

## १६. शिवकामसुन्दरि

रागः नीलाम्बरि
शैलनायकबाला नवनीलवारिदबाला देवी
बालचन्द्रसुफाला चारु हेमपीतसुचेला
हाटकाञ्चितभूषा दैत्यपाटनाधिकरोषा
धृतखेटकासिर(अ)दोषा पिकपाटवोदितभाषा
अरुणाम्बुजचरणा भृशं करुणानिलयाऽरुणा
गौरी, शरणाऽऽगतमरणाऽऽर्तिसंहरणाऽधिकनिपुणा
नामशेषितमदना नवसोमचूडसुवदना मञ्जुहेम -
संसत्सुसदना शिवकामसुन्दर्यवतु नः ।

## १७. शिवकामसुन्दरि

रागः आहिरि
सदयं मां पाहि दीनं सततं भवातिदी(दू)नं
चिदम्बरपुराधीशे शिवकामसुन्दरीशे-सदयं माम् ।
अङ्गजासुदे गम्भीरे तुङ्गपयोधर (धरे) शङ्करार्धदेहे धीरे मेअनिन्ग् नोत् च्लेअर् फ़ोर्
अङ्गजासुदे
शङ्करि (चारुकल्हारे) सदयं
कनकसभेशनारि कमनीयवेषे गौरि जननापहे शृङ्गारे
जगति कृतोपकारे सदयं
करुणामयकटाक्षि कमलदलायताक्षि अरुणकोमलगात्रि
अचलेन्द्र चारुपुत्रि सदयं मां पाहि दीनं

## १८. शिवकामसुन्दरि

रागः तोडि
कुन्ददन्तपङ्क्ते कुशलिके शिवकामसुन्दरि
सुखदानादरचित्ते देवि सन्ततं देवौघसम्पूजिताङ्घ्रिके
वनरूहदलनिभवामाक्षि वामदेवमुखलोलाक्षि
लोकरक्षानुकम्पाक्षि चारुहारे धीरे शङ्करार्धशरीरे ।
जातरूपमञ्जीरे
चण्डमुण्ड (शैल) शतधारपाणिके खण्डपरशुकान्ते
कलकण्ठि तुण्ड(कुण्डल)दीप्तिजिततुहिनमरीचिके
कुवलयाभयशुकसत्पाणे सन्धृतविलसद्वीणे
सम्पालिताऽखिलप्राणे दैत्यभीमे वामे
मौलिधृतसोमे हेमसभेशरामे
शुम्भदम्भनाशे सुवर्णकुण्डलकर्णे जम्भारिवन्धपादे
जलजाभे कुम्भसम्भवेड्ये कुलगिरिकन्यके
कुटिलनीलकचनिकुरुम्बे कोमलाजिताधरबिम्बे
वन्दारुलोकावलम्बे चारुशीले बाले मरतकातिनीले
पाहि मां दानशीले

## १९. शिवकामसुन्दरि

रागः सावेरि

जलजाक्षि गौरि नीलजलवाहवेणि पाहि

बलवैरिविनुते सुकलकण्ठवाणि *करुणाऽऽगतार्ति- * फूलोते हेरे शरणागतार्तिहारि

हारि चरणाम्बुजजाते चिदम्बरनटेशकामिनीशे

वरशैलजाते

कुवलयरुचिराभे भुवनैकरूपे देवि नवरत्नभूषिताङ्गि

शिवकामरूपे

तरुणाम्बुजफाले लसदरुणारुणचेले । मयि कुरु

सामभवयाने करुणामिह बाले ।

## २०. अखिलाण्ड्श्वरि

रागः सावेरि

अम्बुजासनपूजिते शुभकम्बुकन्धरे वामे ।

चलदम्बुजायतलोचने वरजम्बुनायकरामे

कुम्भसम्भवसन्नुते शातकुम्भचारुविभूषे ।

गौरि जम्भशासनवन्द्यवैभवे शुम्भदानवरोषे ।

सुन्दराननमण्डले सुरवृन्दवन्दितपादे ।

देवि मन्वहासविजितकौमुदि कुन्दसन्निभदन्ते

अमलां मे दिश धिषणां (विमलमृदुचेले)

काममखिलाण्डनायकीशे निखिलानुकूले

“कमलासनमाधवेन्द्रपूज्ये कमलव्यायतचारुलोलनेत्रे ।

अमलाम्बरधारिणीह साक्षादखिलाण्डेश्वरि पाहि मामजस्रम् ॥ ”

## २१. शिवकामसुन्दरि

रागः काम्बोदि

पङ्कजभवनुतशीले धृतकङ्कणनवमणिजाले

किङ्करं मामिह बाले पाहि शङ्करि जगदनुकूले ।

सुन्दरवाक् जितवीणे दैत्यवृन्दविभेदप्रवीणे

कुन्दरदे शुभघोणे देवि स्कन्दनुते धृतवाणे

तुङ्गकुचद्वयभारे हेमरङ्गनिवासिनि धीरे
अङ्गलसद् घनसारे धृतपिङ्गलचेले सुहारे
भवजलराशिविनाशे गौरि शिवसुखदे
जगदीशे नवरविकोटिप्रकाशे पाहि शिवकामि सन्नतं मामीश् ।

## २२. शिवकामसुन्दरि

रागः घण्टारवं
वित्तेशविनुते सद्वृत्तेऽम्ब गिरिजे वस
भक्तेष्टफलदात्रि चित्ते मे गिरिजे ।
सुत्रामविनुताङ्घ्रे चित्रांशो गिरिजे देवि मित्राग्निविधुनेत्रे
सुत्राहि गिरिजे
अद्याऽतिसरलास्सद्विद्या मे गिरिजे
निरवद्याः शङ्करि गौरि दद्यास्त्वं गिरिजे ।
तिल्लाटवीभूमिवल्याये गिरिजे ।
देवि कल्याणरङ्गेशकल्याणि गिरिजे
गत्यन्तरं नास्ति सत्यं मे गिरिजे
पाहि भृत्यं मां शिवकामि नित्यं त्वं गिरिजे

## २३. शिवकामसुन्दरि

रागः वाचस्पति
मामनिशं परिपाहि शिवकामसुन्दरि
मे निधेहि मामनिशम् ।
पाणिलसिताङ्कुशपाशे (मञ्जुवनकाण्डके)
भानुकोटिसङ्काशे वाणिविनुते जगदीशे
नववारिदचयनीलशुभकेशपाशे । (मां)
शैलेन्द्रशोभनकन्ये देवि (शातकुम्भास्तरणे) ऽखिलमान्ये
बालेन्दुशेखरे धन्ये परिपालितलोके भवानि वदान्ये
मामनिशम् । (मां)
वारिजेक्षणवन्द्ये बाले परिदूरितदुरितौघे भुवनानुकूले
दारितदनुभवजाले अम्ब गौरि नटेश्वरकान्ते
सुशीले-मामनिशं परिपाहि ।

## २४. शिवकामसुन्दरि

रागः शिरगुप्ति
देहि मधुरवाणी आशु मे देवि देहि मधुरवाणीं
परिमाहि मां शिवकामे पालितलोके (देहि)
सन्ततं विधिनतपदमूले नीले बाले भवानि
मन्दगमने मध्यधृतक्षौमे भीमे वामेऽभिरामे
चन्दनपरिलिप्तकुचभारे धीरे मारेण सेव्ये
कुन्दरदे सुमुखि कुटिलालककान्ते (धि)
नीरजदललोलशुभनेत्रेऽ (मात्रे जम्भकारिवन्द्ये)
घोरदितितनुजकुलखण्डे चण्डे खण्डेन्दुचुडे
सरवदिक्षुचापाङ्कुशपाशे ईशे मेशेन पूज्ये
नारदमुनीडिते नटराजकान्ते (देहि)
करुणाम्बुधे त्रिपुरसुन्दरि गौरि नारीपुरोगे
अरुणाभावतीयैर्भविता ख्याता माता जगतां
पुरुषाणां वशी तेषां भवेद्वाणी वेणी क्षीणींदिवौ च
कुरु मयि कृपां ईशे कुलशैलकन्ये देहि मधुरवाणीं (देहि)

## २५. शिवकामसुन्दरि

रागः आहिरि
। पल्लवि ।
शरणं इह मम तव चरणयुगलं शिवकामसुन्दरि
शरणमिह नान्यथा गतिः । शरणमिह मम तव चरणयुगलम् ।
सकलसुरजनमकुटविलसिततरणिशतनिभ-
विविधमणिरुचि शोभितं मुनिभावितं (शरणं)
(शतद्युतिसहृदय) सलिलजदिनकर नियुतरुचिर
रुचितनो वनजभवहरिविबुधविभुनुतवैभवे
गिरिजे शिवे । (शरणं)
सनकमुखमुनि (जनसन्नुते) सकलजननि
विनतजनजनिमरणसन्दलने विभवदायिनि
मनसि भवशुभनिवह जलनिधिचन्द्रिके सदयेऽम्बिके

(शरशतदण्डित) चण्डमुण्डमधुमहिष दनुजनिशुम्भ-
शुम्भमुखदितिसुत कदलीकाण्डखण्डपटुकलभकर-
वरबाहु (दण्डविलसिते) दण्डपाणिमहामदाहनने
दलि (रि)यापरेतदुरिते चण्डि खण्डपरश्वथो कुशलिते
(शरकाण्डखण्ड) पाशसृणिलसित वरकरमण्डले
मणिकुण्डले शरणं
स्कन्द (गजमुख)जननि घनकलुषवृन्द (नततिदहननिपुणे)
(कुटिलनीलकबरि) सलिलभवमुखि श्यामले भृशकोमले
कुन्दमुकुलधवलशुभरदे गौरि जेत्रि
त्रिपुरसुन्दरि धनपतिसुपूजिते (देहि मम धनं)
सन्ततं सदयमखिलजगदभिवन्दिते
हरनन्दिते शरणमिह

## २६. भुवनेश्वरि

रागः काम्बोदि
नवनीरदालीघननीले नव(रम्भायुगकाञ्चनोरु)
[वदत्कीले (रे)] भुवनेश्वरीन्दुशुभमौले गिरिकन्ये
शिवकामसुन्दरि सुशीले
(अमलमुनिपूज्यचरणे) परिभूतशमने
त्रिलोकिशरणे कमलाभिरामकरणे
करभोरु विमलाङ्गि शङ्करक(भ)रण् (नीलाम्बुजात) वदने
शुभकुन्दतरुणप्रसूनरदने करुणाकदम्बसदने
दुरिताग्निवरुणाक्षि गुप्तमदने
धननिचयसूल्लसद्वेणि निजभक्तजननदलने
नमद्वाणि कनकसमितीशकल्याणि सततं
मे मनसि वस गौरि शर्वाणि

## २७. शिवकामसुन्दरि

रागः कीरवाणि
शैलनायकोदये शमितदानवोदये नीलभासमुदये
निजसुखदे सदये । कीरवाणि ।

भृङ्गकुलाकारवेणि त्वां इन्दुमुखि शिवकामिनि
तव पदकामी सदा नौमि ।
कटकवलयकान्ते कनकमयांशुकान्ते
(नटनाधिराजकान्ते) नलिननयनकान्ते
फालनेत्रि भासुरमृदुशीलगात्रि (त्वामिन्दु)
वामचम्पकनासे वरगुणे हृतनासे हेनसमितिवासे
हिमकररुचिरहासे गानलोले पालय मां दीनपाले (त्वामिन्दु)

## २८. शिवकामसुन्दरि

रागः वसन्ता
(सोममुखि) नवरुचिरतामरसदलनयने
हेमगिरिसदृशकुचे गिरिजे ।
श्यामलजलभृदसित कोमल शुभतनु
शिवकामसुन्दरि सकरुणे गिरिजे
हीरशुभकाञ्चन मञ्जीरवरशोभिपदे
वारणविरोधिरथे गिरिजे
घोरमहिषासुरगिरिभेदशतधारपादनीररुहे गिरिजे
करपुञ्जपरिशोभिशरचापसृणिपाशकरवाल-
मुखशस्त्रे गिरिजे ।
खरकैटभकभीमतरचण्डमधुशुम्भहरणातिनिपुणेऽम्ब
गिरिजे ।
वनजभववैकुण्ठधनदवृषगीर्वाणजननुतिपरे
गौरि गिरिजे ।
कनकसमितीशान (धनकुतुकदे) देवि जननजलधेः
पाहि गिरिजे ।

## २९. शिवकामसुन्दरि

रागः शङ्कराभरणं
गौरि शङ्करि गौरि शङ्करि भूरि चारुतरां वाणी
(देहि मे) भृङ्गासितवेणि गिरिजे नित्यकल्याणि । (गौरि)
शतमखमुखसुरनुतनिजबहुशुभगुणशीले

मणिमयवरभूषणजाले हिमकरशकलाङ्कितमौले (गौरि)
विधुमुखि कमलजमधुरिपुपरमसुफलदात्रि
कुवलयदलकोमलगात्रि (गौरि)
गतिरिह तव पदमिति भजति मनो बहुधा मे
कनकसभेशितुरभिरामे सादरमव मां शिवकामे (गौरि)

## ३०. शिवकामसुन्दरि

रागः पुन्नागवराळी
कलय मे मुदं कुलगिरिजे बलवैरिवन्दितवैभवे ।
जलरुहायतदलनयने त्रिकोणनिलयभासुरे
विलसितवेषे । (कलय)
कञ्जलोचनसोदरि विरिञ्चिसम्पूज्ये
कुञ्जरगमने भावुकपुञ्जसाम्राज्ये
पञ्चसायकजीवनसुरञ्जके गौरि ।
दैत्यवञ्चनानिपुणे देवि सदञ्चिते भूरि (कलय)
चण्डभानुकोटिनूतनमण्डलकान्ते
कुण्डलयुगलशोभितगण्डदेशान्ते
खण्डपरशुकामिनि विखण्डितताप
परपुण्डरीकपुरवासिन्यखण्डचिद्रूपे (कलय)
सन्ततं त्वदीयपादारविन्दमेवाऽहं
चिन्तयामि शिवकामसुन्दर्यमोहं
कुन्दसुमनोऽभिरामतानिन्दकहासे
मयि स्यन्दय करुणारस (मतिपारम्)

## ३१. शिवकामसुन्दरि

रागः गौलबन्दु
शरणागतं मामम्ब सदयं विलोकय
देवि करुणाम्बुनिचे शिवकाम (सुन्दरि)
यौवनोद्धतं लोकं देवेन्द्रः कनकादि
नित्याकलय्य जननं मुधा साधु जीवनं न विधाय
.... .... मे भक्तिं (शरणा)

मातेति मात इति महिलेति सूनुरिति भ्रातेति प्राणिषु
मनी .... .... विविधे क्लेशाम्बुधौ
मातर्निमज्जन्तं मामुत्तारय (शरणा)
जगति त्वदन्या .... .... रचयन्तु लोकाः
जगदम्ब त्वामेव जनिहत्य कलयामि
नगजेऽखिलाभिवन्द्ये
नत .... .... (शरणा)

## ३२. शिवकामसुन्दरि

रागः ??
। पल्लवि ।
तापमपाकुरु मे सानुतापमशेषमुमे
कमलापति सोदरि .... .... पाहि रामे
सुललामे शिवकामे (तापम्)
वनजासनवन्दिते तपोधन .... .... वन्दिते
भक्तजननापहे नन्दिते वरसनकादिकयोगिजनपूजितपाद-
वनजे .... .... वेषे जितरोष (तापं )
मन्दारशैलकुचे भृङ्गवृन्दसुनीलकचे मन्दार
.... .... जे अम्ब वन्दारुवाञ्छितसन्दायिनटराजसुन्दरि
वीणाविनिन्दकवाणि कल्याणि शर्वाणि (तापम्)
(कामिह) देवि शिवे (नित्यं नौमि) महाविभवे स्वामिनि
नतवासवे पाहि मामीशे विततोत्सवे गौरि
(यामिनीनायक) सामिधरे श्रुतकामितदे शिवकामिनि
बाले घननीले चारुशीले (तापं )

## ३३. शिवकामसुन्दरि

रागः मुकारि
सा मामवतु सुधामा नटराजवामा शिवकामा
मौलिधृतसोमाऽऽदृतकामा भृशमभिरामा श्रुतिसीमा
मामवतु (सा)
(शैलाधिप) शुभबाला रुचिजितनीलाम्बुदवरजाला

विलसितबालाऽरुणचेला भुवनानुकूला वरलीला दैत्यजय
कोलाहलशीला (सा)
आरावितकरकीरा नवशुभहारान्वितकुचभारा
नमितशरीरा धृतहीरा मुखजिततारा (रत्याकारा)
सर्वजगदाराधित (सारा) (सा)
अम्बा (मुखरितकदम्बा)ऽगमनिकुरुम्बाऽधरजितबिम्बा
(पृथुल) नितम्बा, जगदम्बा, पालितनिलिम्पा
सानुकम्पा या शिवकाम्यम्बाप्रतिबिम्बा ((सा)

## ३४. शिवकामसुन्दरि

रागः काम्बोदि
। पल्लवि ।
करुणां मयि धेहि हे शिवकामसुन्दरि
अरुणायु(यि)तशोभाधरे सच्चिदानन्दवारिनिधे (करुणां)
मोहपयोधावपारे निमज्याऽतिमूढमतिस्सततम् ।
(ईहया) साधुकुलाचारजीवनानि वृथा कलयन् ।
देहमिमं क्षणभङ्गुरमापदां दीर्घरुजां निलयम् ।
साहसतस्स्थिरमित्यवधार्य स्वयं सम्भ्रमामि शिवे (करुणां)
शर्वरीनाथमुखि स्वपदाश्रितसर्वेष्टदानक्रिया-
निर्वहणातिप्रवीणामुपेक्ष्येह निष्कलङ्कां भवतीं,
गर्वसमुन्नतमानसान् आर्यनिहितवृत्तियुतान्
सर्वदा पामरभूपान् संस्तुत्य सन्नो भवाम्यगजे (करुणां)
कृत्यमकृत्यमितीदं विचार्य तत्कर्तुं न पारयामि,
नित्यं त्वदीयस्वरूपं न मानसे निर्मलं भावयामि,
सत्यं ब्रुवे, तव पादं विना देवि गत्यन्तरं न हि मे,
भृत्यमिमं परिपालय हे सभेशमनोऽभिरामे ।
करुणा मयि देहि हे शिवकामसुन्दरि

## ३५. शिवकामसुन्दरि

रागः कामवर्धिनि
कामजीवितकारणे कमलासनाकलितार्चने

(नाम) गीतिसमादरे सकलेष्टदे सरले शिवे ।
श्यामले शमिताऽसुरे शरणागतार्तिहरे परे
कामदे कमलेक्षणे शिवकामसुन्दरि पाहि मां
धारिजातवरासने वनजाक्षवन्दितवैभवे
दूरिताखिलदुर्मदेऽन्यदुरासदे दुरितापहे ।
भूरिभूषणभूषिते भुवनेशि चारुभुजोज्ज्वले । (कामदे)
कुम्भसम्भव सन्नुते कुलशैलजे कुटिलालके
जम्भवैरिनुते जगन्मयि जन्ममृत्युजरापहे ।
शुम्भडम्भहरे सुरेश्वरि सुस्थिरे सुखदायके (कामदे)
कासराऽसुरकालरूपिणि काङ्क्षितार्थवरप्रदे
वासराधिपवह्निचन्द्रविलोचने वनितामणे
हासनिन्दितचन्द्रिके हरिसेविते हरवल्लभे (कामदे)
पुण्डरीकपुरालये पूरुषत्रये पूरुषभाग्यदे
चण्डभानुसहस्रकोटि(समानदीप्ति) विराजिते
गण्डमण्डलशोभिकुण्डलमण्डिते गतिशोभने (कामदे)
पापनाशिनि पारहीनकृपाम्बुधे परवाक्प्रदे
नीपकाननमन्दिरे निखिलाधिपे निटिलेक्षणे
तापहारिणि ताण्डवेश्वरताण्डवोदयकारणे (कामदे)
सोमबिम्बसमानने सुकुमारदन्ति मुखादरे
कोमले निजसूक्तिकुत्सितकोकिलाधिपभाषणे
हेमसंसदधीशकामिनि हेलया हितदायिके (कामदे)
बालचन्द्रशिखामणे बहुलाऽमरारिबलापहे ।
नोलमेघनिभाङ्गनित्यसुनिर्मले निरयापहे
बालकं भवबाधितं बलद्रुजाऽऽकुलं अम्बिके (कामदे)

## ३६. शिवकामसुन्दरि

रागः काम्बोदि
। पल्लवि ।
गौरि भवतीमेवोपासे मयि भूरि करुणामिह पूरय दासे (गौरि)
सर्वदा कृतपातकोप्यहमिह संरक्षणीयस्सदयं भवत्या ।
सर्वलोकानां हि सवित्री भवसि देवि गीर्वाणनिकुरुम्बवन्द्ये ।

भक्तनिर्वाणदायिन्यनिन्द्ये ।
गौरि शर्वाणि सुगुणाभिनन्द्ये । (गौरि)
जगति देवतामपरामितरे जना भगवति भजन्तु सदा यथेष्टम् ।
निगमशिरोगिरिरिह निखिलैरागमैरपि गगने सुरपुरे
धरण्यां नित्यं निगदितामखिलशरण्यां अहं नगराजतनयां
वरेण्याम् । (गौरि)
भीमसंसृतिवारिधौ बहुलदुःखस्तोमतरङ्गसहिते
निमग्नम् । वामकरणवृन्दवशगं मां परिपाहि
कोमले शुभनामधेये श्रितकामदे नटराजजाये
शिवकामसुन्दरि महामाये (गौरि)

## ३७. शिवकामसुन्दरि

रागः काम्बोदि
। पल्लवि ।
कल्याणि गौरि शिवकामसुन्दरि कल्याणं भूरि भुवि
मे कलय शङ्करि ।
शैलसम्भवे सरसिजवदने शमितदानवे
समवितमदने फाललोचने परिहृतकदने
भवभयापहे भावुकसदने (कल्याणि)
मारसेविते मम मतिनिलये महितवैभवे
मणिशुभवलये
हारशोभिते हतजनिविलये हाटकाञ्चिते हसितकुवलये (कल्याणि)
कामदायके कृतकलिहरणे कमलजादिभिः काङ्क्षितचरणे
नामभासुरे नतजनशरणे नटपतिप्रिये नवनवकरुणे (कल्याणि)

इति श्री अम्बिशास्त्रिभिः प्रणीतानि संस्कृत कीर्तनानि समाप्ता ।

॥ शुभमस्तु ॥

Proofread by Narayanaswami Pallasena

*Sanskrit Kirtanas Composed by Shri Ambishastri*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*